# ॥ श्रीकान्तिमतीश्वर्यष्टकम् ॥

श्रीमत्परमहंसेत्यादि समस्तबिरुदालङ्कृत श्रीजगद्गुरु सार्वभौम शृङ्गगिरि श्री श्री सच्चिदानन्द शिवाभिनव नृसिंहभारती महास्वामिभिः विरचितम् ॥

श्रीमद्वेणुवनेश्वरस्य रमणीं शीताम्शुबिम्बाननाम्
शिञ्जन्नूपुरकोमलांघ्रिकमलां केयूरहारान्विताम् ।
रत्नस्यूतकिरीटकुण्डलधरां हेलाविलासप्रियाम्
श्रीमत्कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥१ ॥

तत्त्वज्ञानिहृदब्जमध्यनिलयां ताम्रापगातीरगाम्
कारुण्याम्बुनिधिं तटित्तुलितभां तालीदलश्यामलाम् ।
लीलासृष्टिविधायिनीं तनुभृतां तात्पर्यबोधाप्तये
तन्वीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥२ ॥

सङ्गीतामृतबिन्दुमध्यभवनां साहित्यनित्यादराम्
स्वारस्याद्भुतनाट्यवीक्षणपरां सालोक्यमुक्त्यादिदाम् ।
साधुभ्यः सकलामरार्थितमहासाम्राज्यलक्ष्मीप्रदाम्
साध्वीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥३ ॥

कल्याणीमखिलाण्डकोटिजननीं कल्हारदामोज्ज्वलाम्
कस्तूरीतिलकाभिराममनिटिलां कञ्जासनाराधिताम् ।
कामारेः कनकाचलेन्द्रधनुषः कारुण्यवारान्निधेः
कान्तां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥४ ॥

भक्तानां भयजालभञ्जनकरीं भान्वब्जशुक्रेक्षणाम्
भाग्योदारगुणान्वितां भगवतीं भण्डासुरध्वम्सिनीम् ।
भास्वद्रत्नकिरीटकुण्डलधरां भद्रासनाध्यासिनीम्
भव्यां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥५ ॥

देवानामभयप्रदां विधिनुतां दुष्टापहन्त्रीं सुखाम्
देशानेकदिगन्तमध्यनिलयां देहार्धदास्यप्रियाम् ।
माधुर्याकरचन्द्रखण्डमकुटां देवाङ्गनासेविताम्
देवीं कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥६ ॥

दुष्टाटोपविनाशनैकनिपुणां दौर्भाग्यविच्छेदिनीम्
दुर्मात्सर्यमदाभिमानमथनीं दुःखापहां प्राणिनाम् ।
दुर्वारामितदैत्यभञ्जनकरीं दुःस्वप्नहन्त्रीं शिवाम्

दुर्गां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥७ ॥

मन्दस्मेरमुखां मरकतश्यामां महावैभवाम्
मातङ्गीं महिषासुरस्य शमनीं मातङ्गकुम्भस्तनीम् ।
मन्दारद्रुमसन्निभां सुमधुरां सिंहासनाध्यासिताम्
मान्यां कान्तिमतीश्वरीं हृदि भजे श्रीराजराजेश्वरीम् ॥८ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]